National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 290-293
© 2025 NJHSR
www.sanskritarticle.com

डॉ. सोमा मण्डल
शैक्षिकपरामर्शदात्री(CDOE),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
डॉ. सोमा मण्डल
शैक्षिकपरामर्शदात्री(CDOE),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# अद्वैतवेदान्ते ब्रह्मस्वरूपम्

**डॉ. सोमा मण्डल**

**DOI:** https://doi.org/10.5281/zenodo.20734452

**शोधसारः -** अद्वैतवेदान्तदर्शने ब्रह्मैव परमसत्यं, जगन्मिथ्या, जीवो ब्रह्मैव नापरः इति सिद्धान्तः सर्वोपनिषदां सारभूतः प्रतिपाद्यते। उपनिषदां प्रतिपाद्यविषयभूतं ब्रह्म निर्गुणं, निर्विशेषं, निरुपाधिकं, निर्विकारं, सर्वव्यापकं, स्वप्रकाशं चैतन्यस्वरूपं परमार्थतत्त्वञ्च अस्ति। जगत् ब्रह्मणः विवर्तरूपं, जीवश्च ब्रह्माभिन्नः। अज्ञानवशात् जीवः स्वस्वरूपं विस्मृत्य संसारबन्धनमनुभवति, किन्तु श्रवण-मनन-निदिध्यासनजनितब्रह्मज्ञानद्वारा तस्य मोक्षप्राप्तिर्भवति। ब्रह्मणः तटस्थलक्षणं जगत्कारणत्वम्, स्वरूपलक्षणं तु सच्चिदानन्दत्वम्। **"सत्यं ज्ञानमनन्तं ब्रह्म", "अहं ब्रह्मास्मि", "तत्त्वमसि", "सर्वं खल्विदं ब्रह्म" "एकमेवाद्वितीयम्"** इत्यादिश्रुतिवाक्यानि ब्रह्मणोऽद्वैतस्वरूपं प्रतिपादयन्ति। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति सिद्धवचनमनुसृत्य ब्रह्मप्रतिपादनाय तल्लक्षणं विचारणीयम्। अतः अस्मिन् लेखे ब्रह्मणः लक्षणमस्माभिः आलोच्यते।

**कुटशब्दाः –** ब्रह्म, अद्वैतवेदान्तः, स्वरूपलक्षणम्, तटस्थलक्षणम्, निर्गुणब्रह्म, सगुणब्रह्म, मोक्षः।

**भूमिका -** भारतीयदर्शनपरम्परायां वेदान्तदर्शनं सर्वोच्चस्थानमलङ्करोति। आचार्यशङ्करभगवत्पादः अद्वैतसिद्धान्तं साररूपेण प्राह - **"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"** (ब्र.ज्ञा.व.मा. - 20) इति । श्रुतिषु **"सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्"**(छा.उ. – 6.2.1), **"तत्तवमसि"** (छा.उ. – 6.8.1) इत्यादिवाक्यैः ब्रह्मणः अद्वितीयत्वं प्रतिपादितम्। नामरूपात्मकं जगदिदं ब्रह्मणि अध्यासरूपेण आरोपितम् अस्ति। जीवः अपि वस्तुतः ब्रह्मस्वरूप एव, किन्तु अनाद्यविद्यावशात् स्वात्मानं शरीर-मनः-इन्द्रियदिविशिष्टैः देहादिभिः सह अभिन्नं मन्यमानः संसारसुखदुःखानि अनुभवति। श्रवणम-नननिदिध्यासनैः अखण्डाकारचित्तवृत्तेरुदयात् अज्ञाननिवृत्तौ जीवः स्वब्रह्मस्वरूपं प्रत्यभिजानाति। वस्तुतः मोक्षः कश्चन नूतनः लाभः न, प्रत्युत नित्यसिद्धस्य आत्मस्वरूपस्य पुनः प्राप्ति इव। अतः वेदान्तदर्शनप्रतिपादितस्य ब्रह्मणः स्वरूपम् अस्माभिः सुतरां विज्ञेयम्।

**ब्रह्मशब्दस्य व्युत्पत्तिः तथा तात्पर्यम्**

"बृहि वृद्धौ" इति धातोः मनिन्-प्रत्यये कृते "ब्रह्म" इति शब्दः निष्पद्यते। "बृहते वर्धते इति ब्रह्म", "बृहति वर्धयति प्रजाः इति ब्रह्म" इति व्युत्पत्त्या ब्रह्मणः निरतिशयमहत्त्वं, सर्वव्यापकत्वं, सर्वाधारत्वं च प्रतिपद्यते। शङ्करभगवत्पादः – "अस्ति तावद्ब्रह्म नित्यशुद्धबुद्ध-मुक्तस्वभावं सर्वज्ञं सर्वशक्ति-समन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थानुगमात् । सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः[1]" । ब्रह्मपदं हि बृहिधातोर्युत्पन्नं भूमानमेव यत्र नान्यत्पश्यति (छा० उ०७।२४।१शा. भा.) भामतीकारोऽपि कथयति - बृहत्त्वाद् बृंहणत्त्वाद् वात्मैव ब्रह्मेति गीयते (ब्र० सू० अध्यासभाष्ये भाम.)" इति। अतो यस्माद् बृहद् नास्ति, यद् देशकालवस्तुपरिच्छेदरहितं, सर्वत्र सततं विद्यमानं तदेव ब्रह्म इति ।

अद्वैतवेदान्तमते आत्मा ब्रह्माभिन्नः वर्तते। 'अत सातत्यगमने' इति सातत्यगमनार्थकाद् अत्-धातोः 'सातिभ्यां मनिन्मनिणौ' इति सूत्रेण कर्तरि मनिन्-प्रत्यये आत्मन् इति शब्दो निष्पद्यते। अतति सन्ततभावेन जाग्रत्स्वप्नसुषुप्त्यादि अवस्थासु अनुवर्तते इत्यात्मा। एतद्विहायापि आप्-धातोः, आपूर्वकाद्-दाधातोः, अद्-धातोश्च आत्मशब्दनिष्पद्यते। तदुक्तं कठोपनिषदि -

**यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।**
**यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते[2] ॥ इति।**

अतः यो हि सर्वं प्राप्नोति, सर्वं गृह्णाति, सर्वं भक्षयति, यश्च सततं विराजमानः सः आत्मा। अनेन आत्मनः सर्वव्यापकत्वं सर्वग्राहकत्वं सर्वनाशकत्वं सततविद्यमानत्वञ्च अभिव्यञ्जन्ते।

**ब्रह्मस्वरूपविवेचनम्**

समग्रोऽयं दृश्यप्रपञ्चः ब्रह्मण एव विवर्त्तरूपेण अवभासते। अद्वैतवेदान्तानुसारं ब्रह्म जगतः परमाधारः, अभिन्ननिमित्तोपादानकारणम्, तत्त्वतः एकमेवाद्वितीयं च अस्ति। अस्मिन् सिद्धान्ते- **"एकमेवाद्वितीयं ब्रह्म"**(छा.उ.- 6.2.1), **"नेह नानास्ति किञ्चन"**( बृ.उ.- 4.4.19), **"इदं सर्वं यदयमात्मा"**( बृ.उ. - 2.4.6) इत्यादिश्रुतिबलेन ब्रह्मणः स्वगत-सजातीय-विजातीयभेदराहित्यं[3], देश- काल-वस्तुपरिच्छेदशून्यत्वं[4] च प्रतिपाद्यते । श्रुतौ **"द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च"**(बृ.उ. -2.3.1) इति सगुण-निर्गुणभेदेन ब्रह्मणः स्वरूपद्वयमुपवर्णितम् । तत्र-**"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति"**(तै.उ. - 3.1) इत्यादीनि सृष्टि-स्थिति-संहारप्रतिपादकानि वचनानि, तथा **"सत्यं ज्ञानमनन्तं ब्रह्म"**(तै.उ. – 2.1), "यो वै भूमा तत्सुखम्"(छा.उ. – 7.21.1), **"विज्ञानमानन्दं ब्रह्म"**(बृ.उ. – 3.9.28), इत्यादिस्वरूपप्रतिपादनपराणि च वचनानि ब्रह्मणः सगुणस्वरूपं प्रतिपादयन्ति । **"अस्थूलमनण्व-ह्रस्व-मदीर्घमलोहितम्"**(बृ.उ. – 3.8.8), **"अशब्दमस्पर्शमरूपमव्ययम्"** (कठ.उ. – 1.3.15) इत्यादिनिषेधवचनानि च ब्रह्मणो निर्गुणत्वे प्रमाणानि।

अद्वैतवेदान्तिनः ब्रह्मणः त्रिविधप्रतीतिं स्वीकुर्वन्ति - निर्गुणब्रह्म, सगुणब्रह्म, जीवश्च। एतेषां भेदः वस्तुतः न तु पारमार्थिकः, किन्तु उपाधिभेदजन्यः। निर्गुणब्रह्म निरुपाधिकं, निर्विकल्पकं, निर्विकारं, सर्वव्यापकं, अद्वितीयं च परमार्थतत्त्वम्। सगुणब्रह्म तु मायोपाधिविशिष्टं ब्रह्म, यत् ईश्वररूपेण जगत्कारणत्वेन उपास्यत्वेन च व्यवह्रियते। जीवः पुनः शरीर-मनः-इन्द्रियोपाधिसम्बद्धं तदेव ब्रह्म इति ज्ञेयम्। भगत्पादशङ्कराचार्यः कथयति – **अस्तितावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्विम्**[5] इति । ब्रह्मणः स्वरूपं किमिति जिज्ञासायां भाष्यकारः उत्तरति - **'जन्माद्यस्य यतः**[6]**'** इति। आचार्यशङ्करभगवत्पादाः स्वभाष्येषु स्पष्टतया प्रतिपादयन्ति यत् श्रुतीनां मुख्यप्रतिपाद्यविषयः निर्गुणब्रह्मैव। तदेव पारमार्थिकसत्यं, तदेव मोक्षस्य विषयः, तदेव आत्मस्वरूपम्। सगुणब्रह्म तु उपासनोपयोगि, व्यवहारदृष्ट्या सत्यं, किन्तु परमार्थतः मायोपाधिकल्पितमेव। यद्यपि ब्रह्मणः वास्तवतः कश्चन भेदः, रूपं वा नास्ति, तथापि अविद्यया कल्पितानामुपाधीनां भेदात् तस्य त्रिविधप्रतीतिः दृश्यते। 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति अभिजनवचनानुसारं ब्रह्मणः स्वरूपविचारणाय अद्वैतिनः स्वरूपतटस्थभेदेन ब्रह्मणो लक्षणद्वयं सङ्गिरन्ते। स्वरूपतटस्थलणयोः लक्षणं ब्रवीति - "स्वरूपमेव सद् व्यावर्तकं स्वरूपलक्षणम्", "कादाचित्कत्वे सति व्यावर्तकं तटस्थ-लक्षणम्"(वेदान्तपरिभाषा) इति। तदनुसारेण सच्चिदानन्दरूपत्वं स्वरूपलक्षणम्, सृष्टि-स्थिति-संहारकर्तृत्वं च तटस्थलक्षणमिति पर्यवस्यति ।

**ब्रह्मणः स्वरूपलक्षणम्**

लक्षणं नाम अव्याप्त्यादिदोषत्रयशून्यत्वम् । लक्ष्यमात्रे विद्यमानः असाधारणो धर्मः। यथा सास्नावत्त्वं गोर्लक्षणम्। लक्षणं हि द्विविधम् स्वरूपलक्षणम्-तटस्थलक्षणं च । वेदान्तपरिभाषाकारः कथयति - **स्वरूपमेव लक्षणम् स्वरूपलक्षणम्**[7] इति। स्वरूपत्वे सति यद् व्यावर्तकं तत् स्वरूपलक्षणमिति तात्पर्यम्। यथा मधुरत्वं हि स्वरूपं शर्करायाः, मधुरत्वं च शर्करां तद्भिन्नेभ्यो लवणादिभ्यो व्यावर्तयति। अतो मधुरत्वं शर्करायाः स्वरूपलक्षणम्। यावत्कालं च शर्करा तिष्ठति तावत्कालं च शर्करायां तत्स्वरूपं मधुरत्वं च तिष्ठति। न हि वस्तु कदापि स्वस्वरूपं जहाति। "**तं त्वौपनिषदं पुरुषं पृच्छामि**" इति श्रुत्याणुरोधेन ब्रह्मविषयिणि जिज्ञासायाम् उपनिषदेव प्रमाणम्। ब्रह्मणः स्वरूपलक्षणं च सच्चिदानन्दात्मकत्वम् इति । ब्रह्मणः स्वरूपलक्षणप्रतिपादकानि श्रुतिवाक्यानि यथा- **"सत्यं ज्ञानमनन्तं ब्रह्म**"(तै.उ. – 2.1.1) **"विज्ञानमानन्दं ब्रह्म**" (बृ.उ. – 3.9.28) "**आनन्दो ब्रह्मेति व्यजानात्**" (तै.उ. – 3.6.1) इत्यादि । तथाहि ब्रह्म सत्यस्वरूपं ज्ञानस्वरूपम् अनन्तस्वरूपम् आनन्दस्वरूपञ्च। यथा प्रकृष्टप्रकाशश्चन्द्रः इत्यादिवाक्येषु प्रकृष्टप्रकाशः चन्द्रस्य स्वरूपान्तर्भूतः तथैव सत्यज्ञानादिकं ब्रह्मणः स्वरूपमेव। ब्रह्म न केवलं ज्ञानस्य आश्रयः, अपि तु ज्ञानमेव; न केवलं आनन्दवान्, अपि तु आनन्दस्वरूपः; न केवलं सत्, अपि तु शाश्वतसत्तारूपः।

उपनिषदः **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"**, **"नेति नेति"** इत्यादिवाक्यैः ब्रह्मणः अवाङ्मनसगोचरत्वं प्रतिपादयन्ति। विशेषणोपादानेन तु विशेष्ये गुणसम्बन्धस्य बोधः भवति, किन्तु ब्रह्मणः निर्विशेषत्वे गुणविशेषणानां कथमुपपत्तिरिति शङ्का जायते।

अत्रोच्यते - सत्यं, ज्ञानम्, आनन्दम्-अनन्तम्, विज्ञानम् इत्येतानि विशेषणानि स्वरूपसमर्पणद्वारेण विरुद्धार्थव्यावर्तकानि सन्ति। तद्यथा सत्यत्वविशेषणेन असत्यात् व्यावृत्तिः अवगन्तव्या। ज्ञानशब्दोऽत्र चिन्मात्रं लक्षयति । चिद्यविशेषणेन ब्रह्मणः अचित्रूपात् व्यावृत्तिः । अन्तवत्वनिवृत्यर्थं उच्यते 'अनन्तमिति'। निरानन्देभ्यः व्यावृत्यर्थं उच्यते 'आनन्दम्' इति । अद्वैतसिद्धौ स्पष्टीकृतं यत् यद्यपि सत्यादि पदानां लक्षणं एकैव निर्विशेषं ब्रह्म तथापि निर्वचनीयंशाधिक्येन न पदान्तरवैयर्थ्यम् ।

पुनः शङ्कते यदि सत्यत्वादयः ब्रह्मणः स्वरूपमेव, न तु तस्मात् पृथग्भूताः धर्माः, तर्हि ते ब्रह्मणः लक्षणरूपेण कथं स्वीक्रियेरन्? लक्षणं हि सामान्यतः धर्मधर्मिभावमपेक्षते। यथा गन्धः पृथिव्याः धर्मः, मधुरत्वं शर्करायाः धर्मः। किन्तु सत्यत्वं ज्ञानत्वम् आनन्दत्वं च ब्रह्मणः स्वरूपमेव, न तु तद्भिन्नाः धर्माः। तर्हि लक्ष्यलक्षणव्यवहारः कथमुपपद्यते?

अत्र अद्वैतवेदान्तिनः समाधत्ते व्यवहारदृष्ट्या कल्पित-धर्मधर्मिभावस्य स्वीकारेण एष दोषः परिह्रियते। यद्यपि सत्यज्ञानानन्दादयः ब्रह्मणः अभिन्नाः, तथापि बुद्ध्युपाधिना तेषां पृथगिव प्रतीतिः जायते। अन्तःकरणवृत्तेः आकारभेदवशात् चैतन्यस्य विभिन्नावच्छेदाः इव प्रतिभासन्ते। अतो ज्ञानस्य ज्ञेयत्वेन, आनन्दस्य

अनुभवरूपत्वेन, सत्यस्य नित्यत्वरूपत्वेन च पृथग्भावः कल्प्यते। एष एव कल्पितः धर्मधर्मिभावः लक्षणलक्ष्यव्यवहारस्य आधारः भवति। स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्य-लक्षणत्वसम्भवात्।

एतदेव सिद्धान्तं पद्मपादाचार्यः पञ्चपादिकायाम् स्पष्टतया प्रतिपादयति - **"आनन्दो विषयानुभवो नित्यत्वं चेति धर्माः, अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते।"**

अर्थात् आनन्दत्वम्, नित्यत्वम्, ज्ञानत्वम् इत्यादयः चैतन्यस्वरूपाद् वस्तुतः पृथक् न सन्ति, तथापि अनुभवादिषु पृथगिव प्रकाशन्ते। तेन तेषां धर्मत्वकल्पना सम्भवति, तथा च ब्रह्मणः स्वरूपलक्षणत्वमपि युक्तिसंगतमेव भवति।

अतः सत्यज्ञानानन्तानन्दादिपदानि न ब्रह्मणः वास्तविकविशेषणानि, न च तद्भिन्नधर्माः; अपि तु तस्य निर्विशेषस्वरूपस्य बोधकानि, विरोधिधर्मव्यावर्तकानि, स्वरूपलक्षणरूपाणि च सन्ति।

यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्। विकारेषु एव स्वस्वरूपव्यभिचारः दृश्यते। यथा दुग्धः स्वरूपपरिवर्तनेन दधि रूपेण परिणमते। अतो न हि दध्नः दुग्धस्य वा सत्यत्वं सम्भवति। चराचरात्मकप्रपञ्चः तावत् ब्रह्मणः विवर्ततः भवति। अतः ब्रह्मणः सत्स्वरूपं न व्यभिचरि।

एवमेव यथा सवितुः प्रकाशः, यथा वा अग्नेः उष्णता तथैव ज्ञानं ब्रह्मणः स्वरूपम्। तच्च ज्ञानं नित्यं कारणान्तरनिरपेक्षत्वात्, सूक्ष्मञ्च कालाकाशादीनां कारणत्वात्।

ब्रह्म देशतः कालतः वस्तुतः अन्तस्य अभावात् अनन्तं भवति । ब्रह्म एव अखिलस्य जगतः कारणम्। कार्य व्याप्य कारणं तिष्ठति। अतो जगद् व्याप्य ब्रह्मणो विद्यमानत्वात् तस्य सर्वव्यापित्वं सिध्यति। त्रिषु कालेषु ब्रह्मणः सत्त्वात् ब्रह्म कालापरिच्छिन्नः। ब्रह्मव्यतिरिक्तस्य द्वितीयवस्तुनः अभावात्, सर्ववस्तुषु अनुस्यूतत्वाद् वा ब्रह्मणः वस्तुतः परिच्छेदोऽपि न सम्भवति। अतः सर्वविधान्तताव्यावर्तकम् अनन्तपदं ब्रह्मणो लक्षणं भवति । "विज्ञानमानन्दं ब्रह्म", "आनन्दं ब्रह्मेति व्यजानात्", "आनन्दं ब्रह्मेति व्यजानात्", "यो वै भूमा तत्सुखम्" इत्यादिश्रुतयः ब्रह्मण आनन्दस्वरूपत्वं प्रतिपादयति।

सच्चिदानन्दस्वरूपं ब्रह्म च निरवयवम् अखण्डम् स्वगत-सजातीय-विजातीयभेदविहीनम्। पञ्चदशीकारः विद्यारण्यमुनिः स्वगतसजातीयविजातीयभेदानां स्वरूपविषये उक्तम् -

**वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः ।**
**वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ॥**

(पञ्चदशी २.२०) इति।

तथाहि वृक्षस्य पत्रपुष्पफलादिभिः स्वावयवेभ्यो भेदः स्वगतो भेदः, वृक्षस्य वृक्षान्तराद् भेदो हि सजातीयो भेदः, वृक्षस्य प्रस्तरादिभ्यो भेदो हि विजातीयो भेदः। ब्रह्मणि एते त्रयो भेदा न वर्तन्ते। छान्दोग्योपनिषदि आम्नायते**"एकमेवाद्वितीयं ब्रह्म"**(छा.उ.-6.2.1) इति। अत्र एकपदेन ब्रह्मणि सजातीयभेदनिरासः, एव पदेन स्वगतभेदनिरासः, अद्वितीयम् इति पदेन विजातीयभेदनिरासः विहितः।

**ब्रह्मणः तटस्थलक्षणम्**

"तटस्थलक्षणं तु यावल्लक्ष्यकालम् अनवस्थितत्वे सति यद् व्यावर्तकम्" इति। यावत्कालं लक्ष्यस्य स्थितिः तावत्कालं लक्ष्ये यद् अविद्यमानमपि लक्ष्यं तद्भिन्नेभ्यो व्यावर्तयति तत् तटस्थलक्षणम्। यथा गन्धवत्त्वं पृथिव्याः तटस्थलक्षणम्। ब्रह्मणः जगज्जन्म-स्थितिलयहेतुः इति तटस्थलक्षणम् । तदाह वेदान्तसूत्रम्-

– **"जन्माद्यस्य यतः[8]"** इति। ब्रह्मणो जगज्जन्मादिकारणत्वे च तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्योक्तश्रुतिर्मानम् – **"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति"[9]** इति। अस्य भाष्ये शङ्करभगवत्पादः स्वयमेव कथयति – "यतो चास्माद्वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते येन जातानि जीवन्ति प्राणान् धारयन्ति वर्धन्ते। विनाशकाले च यत्प्रयन्ति यद् ब्रह्म प्रतिगच्छन्ति अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते। उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहाति भूतानि तदेतद् ब्रह्मलक्षणम्[10]" इति। तत्र च निर्णयवाक्यत्वेनाम्नातम् – **"आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति[11]"** इति। पुनः शङ्कराचार्यभगवत्पादैरुच्यते – "अस्य जगतो ... जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद्ब्रह्म" इति। वेदान्तपरिभाषाकारोऽपि आह – "जगज्जन्मादिकारणत्वं ब्रह्मणः तटस्थलक्षणमिति। जगत्पदेनात्र कार्यजातं सूच्यते। जन्मादीत्यत्र आदिपदेन स्थितिलययोः ग्रहणम्। कारणत्वं चात्र कर्तृत्वरूपम्, तेन न अविद्यायाम् अतिव्याप्तिः, अविद्यायाः जगत्कारणत्वेऽपि कर्तृत्वाभावात्। अतो ब्रह्मणः तटस्थलक्षणं तावत् जगज्जन्म-स्थितिलयकर्तृत्वमिति"।

ब्रह्म जगतः अभिन्ननिमित्तोपादानकारणं भवति। ब्रह्मचैतन्यं विना जगदुत्पत्तेः असम्भवात् ब्रह्म जगतः निमित्तकारणम्। मायाधिष्ठानत्वेन उपादानकारणम्न। तथाहि माया जगतः परिणा-म्युपादानकारणं, मायाधिष्ठानं ब्रह्म च जगतो विवर्तोपा-दानकारणम्। कथं ब्रह्म युगपत् निमित्तकारणत्वम् उपादानकारणञ्च भवितुमर्हति इति प्रश्ने उच्यते - ब्रह्म स्वप्रधानतया निमित्तं, अज्ञानरूपोपाधिप्रधानतया उपादानं च भवति। यथा लूता तन्तुकार्य प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया उपादानं च भवति तद्वत्। तथा चोच्यते-

**"यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्[12]"** ॥ इति ।

**'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'** इति ब्रह्मसूत्रेऽपि ब्रह्म एव जगतः अभिन्ननिमित्तोपादानकारणम् इति साक्षात्प्रतिपादितम्। ब्रह्म प्रकृतिः उपादानं च भवति। चेति पदेन निमित्तकारणता आक्षिप्यते। अत्र हेतुस्तावत् - येन विज्ञातेन सर्वं विज्ञातं स्यादिति प्रतिज्ञा, यथा सौम्य एकेन मृत्पिण्डेन सर्व मृन्मयं विज्ञातं स्यादिति दृष्टान्तश्च। किं बहुना, यतो वा इमानि भूतानि जायन्ते इति श्रुतौ यतः इति पदे श्रूयमाणा पञ्चमी जनिकर्तुः प्रकृतिः इति सूत्रेण अपादानसं-ज्ञाविधानात् भवति। अनेनापि ब्रह्मणः जगदुपादानत्वं भवति स्फुटम्। अतो ब्रह्म एव जगतो निमित्तकारणम् उपादानकारणं चेति स्पष्टम्।

**निर्गुणं ब्रह्म**

अद्वैतवेदान्तानुसारं ब्रह्म स्वभावतः निर्गुणम्। यदि गुणाः सत्याः स्युः, तर्हि अद्वैतभङ्गः स्यात्। यदि मिथ्याः, तर्हि ब्रह्म निर्गुणमेव। ब्रह्मणः निर्गुणता श्रुतिषु बहुत्र प्रतिपाद्यते – **"निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्"** (श्वे.उ. – 6.19), **"यद्वाचानभ्युदितम्"** (केन. – 1.4) **"यतो वाचो निवर्तन्ते"** (तै.उ – 2.4), **"तदेजति तन्नैजति तद्दूरे तद्वन्तिके"**(ईशा.उ. -5), **"न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः"** (के.उ. -1.3), **"अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्"**(कठ.उ. - 1.2.22), **"अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्"** (कठ.उ – 1.3.15), **"अदृश्यम् अव्यवहार्यम् अग्राह्यम् अलक्षणम् अचिन्त्यम् अव्यपदेश्यम् एकात्मप्रत्ययसारम्"**(मा.उ. – 7), **"न चक्षुषा गृह्यते नापि वाचा"** (मा.उ. -3.8) इति। अतो ब्रह्मणो निर्गुणतायाः श्रुतिप्रतिपादितत्वात् तस्य निराकरणं कथञ्चिदपि कर्तुं न शक्यते। एतेषां च सगुणपरत्वेन समन्वयनं श्रुत्यर्थपरित्यागे एव सम्भवति।

**सगुणं ब्रह्म**

सर्वे साधकाः निर्गुणब्रह्मचिन्तने समर्थाः न भवन्ति। तेषामनुग्रहार्थं श्रुतिः सगुणब्रह्मोपासनां विधत्ते। तथा **"यः सर्वज्ञः सर्वविद्"** (मा.उ. - 1.1.9), **"एष सर्वेश्वर एषः सर्वज्ञः"** (मा.उ – 6) , **"सोऽकामयत बहु स्याम्"** (तै.उ – 2.6.4) इत्यादिषु सगुणब्रह्म निरूपितम्। साधकानां हितार्थाय निर्गुणब्रह्मध्याने असमर्थानां कृते ब्रह्मणि कल्पितगुणान् संयोज्य सगुणं ब्रह्म प्रतिपादयति श्रुतिः। कल्पितगुणयोगेन एव ब्रह्मणः सगुणत्वम् इति बोध्यम्, स्वरूपतो ब्रह्म हि निर्गुणं निर्विशेषम्। **"कविर्मनीषी परिभूः स्वयम्भूः, अणोरणीयान् महतो महीयान्"** (कठ.उ. – 1.2.20), **"अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद"** (प्रश्न. ६.६), **"यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि"** (मु. २.२.७), **"एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्"** (मा.उ. - 6), **"सोऽकामयत, बहु स्यां प्रजायेयेति"** (तै.उ. -2.6), **"यतो वा इमानि भूतानि जायन्ते"** (तै.उ. -3.1.1), **"सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः"** (छा.उ.- 3.14.4), **"अयमात्मा वाङ्मयो मनोमयः प्राणमयः"** (बृह.उ. – 1.5.3), **"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"** (श्वे.उ. -4.10) इत्यादिषु सहस्रश्रुतिषु ब्रह्मणः सगुणत्वमालोचितं भवति।

एवं विधिमुखेन निषेधमुखेन च ब्रह्मण उपदेशो कृतं वर्तते श्रुतिषु। **"सत्यं ज्ञानमनन्तं ब्रह्म", "विज्ञानमानन्दं ब्रह्म"** इत्यादिषु श्रुतिषु विधिमुखेन ब्रह्म उपदिश्यते। तथा **"नेह नानास्ति किञ्चन", "अशब्दमस्पर्शमरूपमव्ययम्", "अदृम् अव्यवहार्यम् अग्राह्यम्"** इत्यादिश्रुतिषु निषेधमुखेन ब्रह्मण उपदेशो विहितः।

**उपसंहारः**

अद्वैतवेदान्ते ब्रह्मैव परमसत्यं प्रतिपाद्यते। तदेव सर्वव्यापकं, नित्यं, निरवयवं, ज्ञानानन्दस्वरूपं, अद्वितीयं च। उपनिषदः ब्रह्मणः स्वरूपलक्षणरूपेण "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवाक्यानि, तटस्थलक्षणरूपेण "जन्माद्यस्य यतः" इत्यादिवाक्यानि च प्रतिपादयन्ति। निर्गुणब्रह्म परमार्थतः यथार्थस्वरूपं, सगुणब्रह्म तु उपासनायाः विषयः। ब्रह्मैव एकं परमार्थसत्यं, जीवो ब्रह्मैव, जगच्च ब्रह्मणः अविद्याकल्पितो विवर्तः। यथा रज्जौ सर्पस्य भ्रान्तिरुपजायते, तथैव ब्रह्मणि जगद्भ्रमः प्रतीयते। ज्ञानोदये सति रज्जुस्वरूपस्येव ब्रह्मस्वरूपस्य साक्षात्कारः भवति तथा जगतो मिथ्यात्वं प्रतिपद्यते। वस्तुतः ब्रह्म एकमेव अखण्डं सच्चिदानन्दस्वरूपम्। तदेव सर्वस्य जगतः अधिष्ठानम्, तदेव सर्वभूतानामन्तरात्मा ब्रह्मज्ञानमेव मोक्षस्य साधनम्, तथा च आत्मब्रह्मैक्यसाक्षात्कारः अद्वैतवेदान्तस्य परमलक्ष्यमिति निश्चितम्। ब्रह्मैव एकं निर्विशेषं, निरवयवं, अद्वितीयं, सर्वव्यापकं च तत्त्वम्। तस्मात् पृथक् किमपि स्वतन्त्रं तत्त्वं नास्ति। ब्रह्म स्वभावतो निर्गुणमपि निर्गुणब्रह्मज्ञानाय असमर्थानां मुमुक्षुणां कृते सगुणं ब्रह्म उदिश्यते। सगुणं ब्रह्म हि उपास्यं निर्गुणं ब्रह्म च ज्ञेयम्।

**सन्दर्भग्रन्थसूची**

1. अद्वैततत्त्वमीमांसा अभेदानन्द भट्टाचार्यः परिमल पब्लिकेशन्स दिल्ली 1994
2. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, 36 संस्करण,सं. 2074.
3. बृहदारण्यकोपनिषद् , गीताप्रेस, गोरखपुर, नवम संस्करण सं. 2058.
4. ब्रह्मसूत्रभाष्यम्,श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्, दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी 2011.
5. वेदान्तपरिभाषा, चौखम्बा विद्याभवन, वाराणसी, पु.सं, 2019.

**पाद टिप्पणी -**

1. ब्र.सू.शा.भा.- 1.1.1
2. कठ.उ. – 2.4.1
3. मनुष्यस्य शरीरगतैर्हस्तपादादीन्द्रियैर्यो भेदः स स्वगतभेदः । मनुष्यस्य मनुष्यान्तरेण यो भेदः स सजातीयभेदः । मनुष्यस्य पश्वादिभिर्यो भेदः स विजातीयभेद इत्युच्यते । ब्रह्मणः शरीराद्यवयवाभावान्न तस्य स्वगतभेदः, ब्रह्मसदृशब्रह्माऽन्तराऽभावान्न सजातीयभेदः, ब्रह्मातिरिक्तस्य सर्वस्यापि कल्पितत्वान्न विजातीयभेदः संभवतीति तात्पर्यम् ।
4. परिच्छिन्नत्वं हि देशतः कालतो वस्तुतश्चेति त्रिविधम् । तत्र अत्यन्ताभाव-प्रतियोगित्वं देशपरिच्छिन्नत्वम्, न तु देशान्तरेऽसत्त्वं स्वदेशमात्रसत्त्वं वा। ध्वंस-प्रागभावयोः प्रतियोगित्वं कालपरिच्छिन्नत्वम्, अन्योन्याभावप्रति-योगित्वं च वस्तुपरिच्छिन्नत्वमिति विज्ञेयम्। ब्रह्मण आकाशवद् व्यापकत्वान्न तस्य देशपरिच्छेदः, नित्यत्वान्न कालपरिच्छेदः, सर्वाऽऽत्मकत्वाच्च न वस्तुपरिच्छेद इति बोध्यम्।
5. ब्र.सू. शा.भा. – 1.1.1
6. ब्र.सू. – 1.2.1.
7. वेदान्तपरिभाषा विषयपरिच्छेदः
8. ब्र.सू. – 1.1.2
9. तै.उ. - 3.1.1
10. तै.उ.शा.भा. – 3.1.1
11. तै.उ – 3.6.1
12. मा.उ – 1.1.7